# Shri Swaminatha Shatkam

# શ્રીસ્વામિનાથષટ્કમ્

## Document Information

Text title : Svaminatha Shatkam

File name : svAminAthaShaTkam.itx

Category : subrahmanya, ShaTkam

Location : doc_subrahmanya

Author : Anantarama Dikshita

Transliterated by : Malathi Ravi Kuduvaa

Proofread by : Malathi Ravi Kuduvaa

Latest update : January 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2021

*sanskritdocuments.org*

# શ્રીસ્વામિનાથષટ્કમ્

હે સ્વામિનાથાર્તબન્ધો ।
ભસ્મલિપ્તાઙ્ગ ગાઙ્ગેય કારુણ્યસિન્ધો ॥ ૧॥

રુદ્રાક્ષધારિન્નમસ્તે રૌદ્રરોગં હર ત્વં પુરારેર્ગુરોર્મે ।
રાકેન્દુવક્ત્રં ભવન્તં મારરૂપં કુમારં ભજે કામપૂરમ્ ॥ ૨॥

માં પાહિ રોગાદઘોરાત્ મઙ્ગલાપાઙ્ગપાતેન ભઙ્ગાત્સ્વરાણામ્ ।
કાલાચ્ચ દુષ્પાકકૂલાત્ કાલકાલસ્ય સૂનું ભજે ક્રાન્તસાનુમ્ ॥ ૩॥

બ્રહ્માદયો યસ્ય શિષ્યાઃ બ્રહ્મપુત્રા ગિરૌ યસ્ય સોપાનભૂતાઃ ।
સૈન્યં સુરાશ્ચાપિ સર્વે સામવેદાદિગેયં ભજે કાર્તિકેયમ્ ॥ ૪॥

કાષાય સંવીતગાત્રં કામરોગાદિ સંહારિભિક્ષાન્ન પાત્રમ્ ।
કારુણ્યસમ્પૂર્ણનેત્રં શક્તિહસ્તં પવિત્રં ભજે શમ્ભુપુત્રમ્ ॥ ૫॥

શ્રીસ્વામિશૈલે વસન્તં સાધુસઙ્ઘસ્ય રોગાન્ સદા સંહરન્તમ્ ।
ઓઙ્કારતત્ત્વં વદન્તં શમ્ભુકર્ણે હસન્તં ભજેઽહં શિશું તમ્ ॥ ૬॥

સ્તોત્રં કૃતં ચિત્રચિત્રં દીક્ષિતાનન્તરામેણ સર્વાર્થસિદ્ધ્યૈ ।
ભક્ત્યા પઠેત્ યઃ પ્રભાતે દેવદેવપ્રસાદાત્ લભેતાષ્ટસિદ્ધિમ્ ॥

ઇતિ શ્રીસ્વામિનાથષટ્કં સમ્પૂર્ણમ્ ।

Encoded and proofread by Malathi Ravi Kuduvaa

Please send corrections to *sanskrit@cheerful.com*